Gurukul International Multidisciplinary Research Journal (GIMRJ)*with* International Impact Factor 8.357
Peer Reviewed Journal
https://doi.org/10.69758/GIMRJ/2511S01V13P008

e-ISSN No. 2394-8426
Special Issue on Scientific Research Nov'25
Issue–XI(I), Volume–XIII

# किंप्रधानकम् आख्यातम्?

**श्री चन्द्रमौलि कल्याणः,**
सहायकाचार्यः(अतिथिः),
व्याकरणविभागः,
एकलव्यपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
अगर्तला
Email ID – chandramoulikalyan22@gmail.com

**शोधसारः-**

- आख्यातपदार्थः कः
- आख्याते कस्य मुख्यत्वम्
- सामान्यतया शाब्दबोधक्रमः
- एकतिङ्-वाक्यम्
- आख्यातेन उपस्थापितार्थेषु वैमत्यम्
- आख्यातार्थानां परस्परम् अन्वयः
- भावप्रधानमाख्यातम् इति सिद्धान्तोपस्थापनम्

**कूटशब्दाः-** भावः, व्यापारः, फलम्, आख्यातम्, धातुः, तिङ्, कर्तृ, कर्म, संख्या, कालः, प्रकृतिः, प्रत्ययः।

**उपोद्घातः-**

प्रत्यक्षानुमानोपमानशब्दाः इति ज्ञानकरणानि प्रमाणानि चत्वारि, तथैव ततः जायमाना प्रमाऽपि चतुर्धा । तत्र अन्यतमे शाब्दबोधे कस्य प्राधान्यमिति प्रश्नः। अर्थात् क्रियापदं विना वाक्यं न भवतीति तु ज्ञायते एव, तत्रापि तिङन्तकियां वना वाक्यं सामान्यतः न भवति। तत्र तङन्तसहितवाक्यस्य शाब्दबोधे कस्य प्राधान्यमिति अत्र विचार्यते।

**आख्यातपदार्थः-**

अत्र आख्यातमिति पदं बहुधा श्रूयते, किमिदमाख्यातम् इति चेत्, दृश्यते तावत्-"आख्यातमाख्यातेन क्रियासातत्ये"[1] इति। मयूरव्यंसकादिगणसूत्रे आख्यातपदं तिङन्तपरम्। अत एव "पचतभृज्जता", "खादतमोदता" इत्यादीनि तदुदाहरणानि प्राप्यन्ते। किञ्च वैयाकरणभूषणसारे तु कर्तृकर्मणोस्तिङर्थत्वसाधनक्रमे व्यलेखि यत् – "नन्वनयोराख्यातार्थत्वे किं मानमिति"।[2] अत्राख्यातपदेन तिङां ग्रहणं अकारि। तिङ्वाच्यसंख्यायाः कर्तरि प्रत्यये सति कर्तरि, कर्मप्रत्यये च कर्मणि विशेषणत्वमभ्युपगच्छता व्यलेखि तत्र - आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति आख्यातजन्योपस्थितिः कर्तृकर्मणोः कारणमिति।

आतश्च न्यायसिद्धान्तमुक्तावल्यां लिख्यते विश्वनाथाचार्यैः – वैयाकरणैः आख्यातस्य कर्तरि शक्तिरुच्यते। तच्च गौरवात् त्यज्यते इति। अत्र स्थलद्वये आख्यातपदं तिङो बोधकं दृश्यते। अनेन प्रकारेण इदं स्पष्टं भवति यद् वैयाकरणसम्प्रदाये आख्यातपदं तिङः तिङन्तस्य च बोधकं वरीवर्ति इति। प्रस्तुतनिबन्धे चाख्यातपदं तिङन्तबोधकमभिप्रेतमस्ति इति सुधीभिः ग्राह्यम्।

**आख्याते कस्य मख्यत्वम् -**

एतावता आख्यतशब्दस्य अर्थः विचारितः। तिङन्ते च यावन्तः अर्थाः उपस्थिताः सन्ति, तत्र कस्य प्राधान्यमित्यत्र बहवो विप्रलपन्ति। तथा हि निरुक्तकारयास्काचार्यैः तावत् – "भावप्रधानमाख्यातमिति"[3]। अस्य व्याख्यानं शास्त्रज्ञैः नानाप्रकारेण क्रियते। तत्र कः अर्थः ग्राह्यः इत्यपि अत्र प्रसङ्गे अग्रे विचार्यते। आदौ प्रधानत्वेन विवक्षितो भावश्चात्र व्यापाररूपार्थकः। उक्तञ्च "व्यापारो भावना सैवोत्पादना सैव च क्रिया"[4] इति। अयमाशयः व्यापारः,

---

[1] पा.सू.२/१/७२ गणसूत्रम्
[2] वैयाकरणभूषणसारे धात्वर्थनिर्णये
[3] निरुक्तम्
[4] वैयाकरणभूषणसारस्य ५ श्लोकः

Gurukul International Multidisciplinary Research Journal (GIMRJ)*with* International Impact Factor 8.357
Peer Reviewed Journal
https://doi.org/10.69758/GIMRJ/2511S01V13P008

e-ISSN No. 2394-8426
Special Issue on Scientific Research Nov'25
Issue–XI(I), Volume–XIII

भावः,भावना, उत्पादना. क्रिया इत्यादयः शब्दाः पर्यायवाचिनः सन्ति। अतोऽत्र भावपदार्थः क्रियेति ग्राह्यम्। स च भावः कुत्र प्राधान्यं भजते इति प्रश्ने, शाब्दबोधे तस्य प्राधान्यमिति ज्ञेयम्। शाब्दबोधो हि सर्वशास्त्रोपयोगी। स च शब्दजन्यबोधात्मकः । किन्तु कस्माच्चिदपि शब्दात् कस्याप्यर्थस्य बोधस्तावत् पर्यन्तं न भवति, यावत् तस्मात् तदर्थस्योपस्थितिर्न भवति। किञ्च तस्माच्छब्दात् तस्यार्थस्योपस्थितिरपि तावत्पर्यन्तं न भवति, यावत् तदर्थनिरूपिता शक्तिस्तस्मिन् शब्दे गृहीता न स्यात्।

**शाब्दबोधक्रमः-**

अत्रेदं ज्ञेयम्- अर्थनिरूपिता शक्तिः पदे तिष्ठति, अत एव शक्त्याश्रयत्वादेव पदं शक्तमित्युच्यते। एवञ्च शाब्दबोधे पूर्वं तावत् शक्तिग्रहः, तत उपस्थितिः, ततः शाब्दबोध इत्ययं शक्तिग्रहपदार्थोपस्थितिशाब्दबोधानां पौर्वापर्यक्रमः। तदुक्तम्-

**"पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलन्तत्र शक्तिधीः सहकारिणी"॥**

**एकतिङ्-वाक्यम्-**

इयञ्च प्रक्रिया सामान्यभूता शाब्दबोधस्य पदार्थबोधात्मिकात्वेन। वस्तुतस्तु सर्वं वाक्यं क्रियायां परिसमाप्यत इति अवधेयम्। एतादृशनियमसत्त्वात् क्रियामन्तरा कोऽपि निराकाङ्क्षबोधो भवितुं नार्हतीति। किञ्च शाब्दबोधपदेन वाक्यार्थबोध एव गृह्यते। वाक्ये च अनेकानि पदानि भवन्ति, जायते च तेषां पारस्परिकोऽन्वय व्यपेक्षात्मकः इति शाब्दबोधस्य नामान्तरम् अन्वयबोधोऽप्यस्तीति ध्यातव्यम्। तथा च वाक्यं क्रियया विना न भवति इति ज्ञातम्, तत्रापि भाष्यकृद्भिः उच्यते – "एकतिङ् वाक्यमिति"[5]। अर्थात् क्रियां विना तु वाक्यं न भवति इति त्वस्त्येव, तत्रापि तिङन्तं विना वाक्यं न भवतीति भाष्याशयः। एतादृशस्य वाक्यस्य अन्वयबोधे भावस्य प्राधान्यमध्यवसीयते। यत्र कस्यचित् प्राधान्यं विद्यते, तत्र निश्चप्रचं कस्यचिदप्राधान्यमपि तिष्ठति। एवञ्च शाब्दबोधस्थले सन्ति कति पदार्थाः? तेषां पारस्परिकः प्राधान्याप्राधान्यभावः कीदृशः इति जिज्ञासा उदेति।

**आख्यातेन उपस्थापितार्थेषु वैमत्यम्-**

एतावता यच्छाब्दबोधस्य मुख्यं साधनं क्रिया इति विचारितम्, तस्याः क्रियायाः वाचकश्च भवति धातुः। धातोश्च भवति प्रत्ययस्तिङाख्यः । तत्र तिङर्थधात्वर्थयोर्मध्ये वर्तते मतबाहुल्यं शास्त्रज्ञानां परस्परम्। वैयाकारणैः तावत् फलव्यापारौ धात्वर्थौ, कर्तृकर्मसंख्याकालाः तिङर्थाः इति स्वीक्रियते। यत्तु तार्किकाः धात्वर्थः फलं व्यापारश्चेति। आख्यातार्थः कृतिः(यत्नः)। अत्र च "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रे कर्तृकर्मपदयोः धर्मपरत्वम्, भावप्रधाननिर्देशः इति यावत्। अस्मिन् सूत्रे "कर्तरि कृत्" इति सूत्रादनुवृत्तं कर्तरीति पदं तथा सूत्रस्थं कर्मपदं च कर्तृत्वकर्मत्वपरम्। कर्तृत्वं हि कृतिमत्त्वं, कृतिमत्त्वञ्च कृतिरेव। कृतौ शक्तिस्वीकारे, तिङः कृतित्वं भवति शक्यतावच्छेदकम्, तच्च प्रत्येकं कर्तरि एकैवेति कृत्वा शक्यतावच्छेदके लाघवदृष्ट्या कर्तृत्वमेवाख्यातवाच्यम्। कर्तुराख्यातार्थत्वे तु कृतिः शक्यतावच्छेदकं स्यात्। सा च कृतिः प्रत्येकं कर्तरि भिन्नभिन्नेति शक्यतावच्छेदके गौरवमेव स्यात्। एवमेव कर्मत्वमेवाख्यातार्थः। तच्च फलमेव वर्तते इत्याहुः।

तन्न। फलव्यापारयोर्धातुरित्युक्त्या फलव्यापारयोः धात्वर्थत्वे सिद्धे पुनः तिङः तत्र शक्तिकल्पनस्यानौचित्यात्, "उक्तार्थानामप्रयोगः" इति नियमसत्वाच्च । किञ्च कृतेस्तिङर्थत्वे "रथो गच्छति" इत्यत्र अचेतने रथे चेतनवृत्तेः कृतेः असम्भवात् कथं बोधः शक्येत ? अर्थात् कृतिमान् रथ इति शाब्दबोधस्तु कर्तुमशक्य एव। किञ्च "घटं जानाति" इत्यत्र घटविषयकज्ञानानुकूलकृतिमांश्चैत्र इति बोधोऽपि दुरुपपाद एव। यतो हि ज्ञानजन्येच्छाजन्या कृतिः ज्ञानजनिका कथं भवितुमर्हा? आतश्च कतिः न तिङर्थः, धातुनैव तल्लाभात्, अपि तु "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रबलात् कर्तकर्मणी एव। यत्तु मीमांसकाः धात्वर्थः केवलं फलमेव, आख्यातार्थः (तिङर्थः) व्यापारः, कर्तुः कर्मणश्चाक्षेपाद् बोधः। शाब्दबोधे च व्यापारस्यैव प्राधान्यम्, स च व्यापारः प्रत्ययवाच्यः इति तन्न। अभिधानानभिधानव्यवस्थोच्छेदापत्तेः।

प्राधान्ये तु व्याकरणसम्प्रदायस्यापि नव्यं प्राचीनञ्चेति कृत्वा द्वैविध्यं वर्तते। तत्र प्राचीनाः वैयाकरणाः वदन्ति फलं व्यापारश्चेति उभयं धात्वर्थः। तत्र फले व्यापारे च पृथक् पृथक् खण्डशः शक्तिः एकवृन्तगतफलद्वयन्यायेन स्वीक्रियते कर्तृवाच्ये कर्मवाच्ये चोभयत्र शाब्दबोधे व्यापार एव प्रधानं भवति। नव्यवैयाकरणैश्च फलविशिष्टो व्यापारो धात्वर्थः। फलविशिष्टे व्यापारे धातोरेकैव शक्तिः । किन्तु ग्रामादिकर्मणो ग्रामं

[5] समर्थःपदविधिः इति सूत्रभाष्ये

गच्छतीत्यादौ गम्धात्वर्थैकदेशे फलेऽन्वयोऽत्र मते दुरुपपाद एव, पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेत्यभ्युपगमात् । देवदत्तस्य गुरुकुलमित्यादिवद् नित्यसाकाङ्क्षत्वं स्वीकृत्यान्वयस्वीकारे गौरवभारः सोढव्य एवात्र मते। आख्यातार्थः कर्तृकर्मसंख्याकालाश्चात्र मते। कर्तृवाच्ये शाब्दबोधे व्यापारः प्रधानं भवति, कर्मवाच्ये च फलं प्रधानं भवति।

एतावता विचारेणेदं स्पष्टं भवति यत् शाब्दबोधस्थले भवन्ति अनेकतत्त्वानि कर्तृकर्मसंख्याकालफलव्यापारात्मकानि। एषु कस्य कथञ्च प्राधान्यमिति विवेचनीयम्। ततः प्राक् कोऽयं व्यापार इति विचारणीयम्। तत्र न तावत् फलप्रयोजकक्रियात्वं व्यापारः, आत्माश्रयदोषग्रस्तत्वात्। क्रियात्वमेव व्यापारः, व्यापार एव च क्रियेति स्वकीयलक्षणे स्वस्यैव प्रवेश इति आत्माश्रयो दोषः। तत्र क्रियाविषये उक्तं भूषणे- "व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया"[6]। धातुबोध्या क्रिया सदा साध्यैव भवति। ततः धातोः पुनः भावार्थे क्रियमाणेन कृदादिप्रत्यये 'पक्तः, गतः' इत्यादौ सा सिद्धत्वं यातीत्यन्यदेतत्। एवञ्च भूषणोक्तदिशा साध्यत्वेनाभिधीयमाना क्रियैव व्यापार इति निश्चितम्।

तत्रैवोक्तं फलत्वञ्च – "तद्धात्वर्थव्यापारजन्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वम्" इति। न च प्रयागात् काशीं गच्छति चैत्रे चैत्रनिष्ठव्यापारेण यथा काश्या सह संयोगो भवति, तथैव प्रयागात् विभागोऽपि जन्यते इति सोऽपि फलत्वं यायादिति वाच्यम्। अत एव फललक्षणे विशेष्यदलं तद्धातुजन्योपस्थितिविषयत्वमिति निर्दिष्टम्। विभागस्तु गम्धातुजन्योपस्थितिविषयतां नैव भजत इति न काप्यनुपपत्तिः।

**<u>आख्यातार्थानां परस्परम् अन्वयः-</u>**

तिङन्तेन उपस्थापितेषु अर्थेषु मध्ये कस्य कुत्र अन्वयः इति ज्ञातव्यम्। तत्र च कस्य मुख्यं प्राधान्यमिति विचारे वैयाकरणास्तावत् तिङर्थकर्तृकर्मसंख्याकालेषु कर्तृकर्मणी फलव्यापारयोर्विशेषणे भवतः। तत्र कर्तुः व्यापारे तथा कर्मणः च फले अन्वयः भवति। संख्यायाः तु कर्तृवाच्ये कर्तरि तथा कर्मवाच्ये कर्मणि समन्वयः भवति। कालस्तु व्यापारे अन्वेति। तथा च संख्याप्रकारकबोधं प्रति आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति आख्यातजन्यकर्तृकर्मोपस्थितिः कारणमिति वदन्ति। कर्तुः च यद्यपि संख्यां प्रति विशेष्यत्वं भासते, तथापि धात्वर्थव्यापारे सविशेषणं भवति। शाब्दबोधे च मुख्यविशेष्यता व्यापारस्य एवावतिष्ठते। तथा च देवदत्तो ग्रामं गच्छतीति वाक्यस्य पूर्वोक्तरीत्या शाब्दबोधश्चैतादृशः भवति- देवदत्ताभिन्नैकत्वावच्छिन्नकर्तृवृत्तिः ग्रामनिष्ठसंयोगानुकूलो वर्तमानकालिको व्यापारः। अयं व्यापारमुख्यविशेष्यको बोधः।

अत्र नैयायिकमतं भिन्नं विद्यते। यत्र वैयाकरणाः आख्यातार्थसंख्यायाः कर्तृकर्मणोरन्वयमभ्युपगच्छन्ति तत्र नैयायिकाः प्रथमान्तार्थेऽन्वयं स्वीकुर्वन्ति। यद्यपि कर्तृवाच्ये कर्तुः प्रथमान्तत्वम्, कर्मवाच्ये च कर्मणः प्रथमान्तत्वं सुतरामेव सिद्धं भवति, तथापि संख्यान्वयं प्रथमान्तार्थे वदतो नैयायिकस्य पार्थक्यं जायत एव। तच्च गौरवयुक्तं भवति यथा- आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमित्युक्ते सति "चन्द्र इव मुखं दृश्यते" इत्यत्र चाक्षुषप्रत्यक्षानुकूलव्यापारजन्यदर्शनाश्रयाभिन्नं चन्द्रप्रतियोगिकसादृश्यवदेकत्वावच्छिन्नं मुखमिति शाब्दबोधः स्यात्, अत्र मुखे दर्शनम्, सादृश्यम्, एकत्वञ्चेति विशेषणत्रयं भवति। इमानि विशेषणानि यथा मुखे गतानि, तथैव चन्द्रपदार्थस्यापि प्रथमान्तपदेनोपस्थित्या तत्रापि केवलमेकत्वस्यान्वयः कथं न भवति।

अयमाशयः यथा मुखे एकत्वमन्वेति, तथा चन्द्रेऽपि तदन्वयो स्यादेव। इदं परिहर्तुं यदुच्यते तस्मिन्नेव प्रथमान्तार्थे संख्यान्वयोऽभिहितो यः खलु कस्मिंश्चिदितरस्मिन् पदार्थेऽन्वितो न भवेत्। वर्तते चात्र चन्द्रोऽन्वितो विशेषणतया इवार्थे सादृश्य इति न तत्र संख्यान्वयः। किन्तु एतादृशकल्पानागौरवं वर्तत एव इति उपेक्षणीयमिदं मतम्। वैयाकरणमतानुसारं तु नेदं दूषणं यतो हि तन्मते तु संख्याप्रकारकबोधं प्रति आख्यातजन्यकर्तृकर्मणोरेवोपस्थितिः कारणं भवति। अत्राख्यातेन तप्रत्ययेन मुखमेव कर्मत्वेनोक्तं न तु चन्द्रोऽपि। तस्मादत्र मते लाघवमेव।

व्यापारस्य धात्वर्थत्वं वैयाकरणमते न्यायमते च समानमेव, तथापि शाब्दबोधे व्यापारस्य प्राधान्याप्राधान्यविषये वर्तते उभयोर्मतभेदः। वैयाकरणाः शाब्दबोधे धात्वर्थव्यापारस्य प्राधान्यं स्वीकुर्वन्ति । कर्ता चात्र मते व्यापारे विशेषणतां भजते। तत्र व्यापारो धात्वर्थतया प्रकृत्यर्थः। कर्त्ता च प्रत्ययार्थः। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यं "पक्ता, पाचकः" इत्यादिप्रयोगेषु दृश्यते, तथैवात्रापि शाब्दबोधे प्रत्ययार्थस्य कर्तुरेव प्राधान्यमुचितं यद्यपि, तथापि **"भावप्रधानमाख्यातम्"**[7] इति निरुक्तवचनात् तथा "भूवादयो धातवः"[8] इति सूत्रस्थक्रियाप्राधान्यबोधकभाष्याच्चात्र

[6] वैयाकरणभूषणसारे धात्वर्थनिर्णये
[7] निरुक्ते

धात्वर्थभावस्यैव (व्यापारस्यैव) प्राधान्यं स्वीकियते। अत्रैव च मते "पश्य मृगो धावति" इति वाक्यस्य एकवाक्यता सम्भवति।

न्यायनये तु शाब्दबोधे प्रथमान्तार्थस्यैव प्राधान्यं भवति। तेन चैत्रः ग्रामं गच्छति वाक्यस्यात्र एवं बोधः भवति- ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृतिमानेकत्वावच्छिन्नो चैत्रः। कृतिमांश्च कर्त्ता एव भवति। तेन कृतिमता सह चैत्रस्यात्र अभेदान्वयः। एवमेव "पश्य मृगो धावति" इति वाक्यादपि "धावनाश्रयो मृगः, तत्कर्मकं दर्शनम्" इति बोधे मृगस्य दृशिक्रियायाः कर्मत्वेन तत्र द्वितीयापत्तिः स्यात् इति दोषः। तथा च "मृगो धावति, तं पश्य" इति वाक्यद्वयमत्रापद्येत। अयमाशयः पूर्वोक्तवाक्यात् "एकत्वावच्छिन्नमृगाभिन्नकर्तृवृत्तिर्धावनात्मकव्यापारकर्मकत्वतदभिन्नैककर्तृको दर्शनानुकूलो वर्तमानकालिको व्यापारः" एवं रूपेण एकवाक्यत्वं भाष्यकारादिसम्मतं तन्मते न सिध्येत्। वैयाकरणमते तावत् धावनमस्ति, तत्तु यद्यपि दर्शनक्रियायाः कर्म अस्ति, तथापि तत्र द्वितीया न भवति, यतो हि धावनवाचकोऽत्र धाव्-धातुर्वर्तते। न च धातोर्ज्यन्ते सुप्प्रत्ययाः। एवं रीत्या वैयाकरणसम्प्रदाये त्वत्र द्वितीयापत्तिरूपः दोषः नास्त्येव।

मीमांसकनये तु शाब्दबोधे व्यापारस्य प्राधान्ये स्वीक्रियमाणेऽपि व्यापारो न धात्वर्थः, किन्त्वाख्यातार्थः (तिङर्थः) अस्तीति स्वीकृतं वर्तते। "पचति" इति पदस्य विवरणं क्रियते "पाकं करोति" इत्येवं रूपेण । तत्र पाकमिति फलमात्रमेव प्रतीयते पच्-धातोरर्थः। करोतीति तु तिप्प्रत्ययस्यार्थः। एवञ्च यत्नार्थककरोतिना विवरणकरणात् तिपः यत्नो व्यापारो भावना वा शक्यार्थः।

तन्मते तिङः कर्त्रर्थत्वाभावात् कथं कर्तृप्रतीतिरिति चेदुच्यते, आक्षेपात् कर्त्तव्यः कर्तुः बोधः इति। किन्तु इदं चन्त्यम्, यतो हि "कर्तरि कृत्" इति सूत्रतः "कर्तरि" इति पदमायाति "लः कर्मणि च भावे चाकर्मकेभ्यः"[9] इति सूत्रे। यद्यत्रागतस्य कर्तरिपदस्यार्थः व्यापारः क्रियते, तदा कृदन्ते कर्तरि विहितप्रत्ययानामपि कर्तृवाचकत्वं नैव स्यात्, व्यापारवाचकत्वमेव स्यात्। यदि तत्रत्यं "कर्तरि" 'इति पदं कर्तृवाचकं तर्हि तिङन्तेऽपि लकारवाच्यः कर्त्ता एव न तु व्यापारः। किञ्च कृदन्ते यथा कर्तरि विहिताः प्रत्ययाः कर्तृवाचकाः स्वीक्रियन्ते भावनायाश्च तत्राक्षेपः क्रियते, तथैव तिङन्तेऽपि लकारवाच्यः कर्ता कर्म च स्वीक्रियताम्। अत्रापि भावनाया एव क्रियतामाक्षेपः। ननु शाब्दबोधे व्यापारस्य प्राधान्यं न स्यात्, आक्षिप्तस्य भावस्य प्राधान्यमयुक्तमिति नियमादिति चेन्न जातिशक्तिवादिभिः स्वीकृतमेव आक्षिप्तस्यापि प्राधान्यम्। "घटमानय" इत्युक्ते आक्षिप्ता व्यक्तिरेवानीयते, न तु जातिरपि। किञ्च व्यापारस्य धातुवाच्यत्वे अपरश्चायं हेतुः यत्- पक्ता देवदत्त इत्यस्य शाब्दबोधो भवति - पाकानुकूलव्यापारवान् देवदत्तः कर्त्ता, तथैव "पचति देवदत्तः" इत्यत्रापि पाकानुकूलो व्यापारो देवदत्ताभिन्नकर्तृवृत्तिरिति कर्त्रा सहाभेदान्वयः समानः, तदर्थम् उभयत्र कर्त्ता एव प्रत्ययार्थः, व्यापारश्च धात्वर्थ इति स्वीक्रियताम्, अस्मिन् मते लाघवस्य सत्त्वात्, दोषराहित्याच्च।

**भावप्रधानमाख्यातम्-**

अनया रीत्या फलं व्यापारश्च धात्वर्थः । तिङर्थश्च कर्तृकर्मसंख्याकालाः । व्यापारस्य नामान्तरं भाव इति। शाब्दबोधे भाव एव प्राधान्यं भजते, "भावप्रधानमाख्यातमिति" उक्तत्वात्। तत्र च आख्यातपदेन तिङन्तं ग्राह्यम्। न च आख्यातपदेन तिङ्प्रत्ययः गृह्यतामिति वाच्यम्। "आख्यातमाख्यातेन क्रियासातत्ये"[10] इत्यस्य भङ्गापत्तेः।

किञ्च भावप्रधानमित्यत्र बहुव्रीहिः समासः द्रष्टव्यः। भावः प्रधानं यस्य तत् भावप्रधानम्, तच्च आख्यातं तिङन्तम् इति यावत्। यत्तु भावप्रधानमित्यत्र भावस्य पधानम् इति तत्पुरुषः, भावस्य इत्यत्र षष्ठ्यर्थः निरूपितत्वम्, तस्य च प्रधानैकदेशे प्राधान्ये अन्वयः, एवञ्च भावनिरूपितप्राधान्यवत् प्रधानम् आख्यातमिति आयाति इति। तन्न। पदार्थः पदार्थेनान्वेति न तु तदेकदेशेन इति नियमस्य उच्छेदापत्तेः, बहुव्रीहिणैव अपेक्षितार्थलाभाच्च। इदमवधेयं अत्र भावश्चोपलक्षणं फलस्यापि। तेन कर्तरि लकारे भावस्य (व्यापारस्य) प्राधान्यं, कर्मणि लकारे च फलस्य प्राधान्यमिति साधीयान् पन्थाः। व्यापारविशेष्यकः शाब्दबोधस्तु दृष्टपूर्वः। साम्प्रतं फलविशेष्यकः शाब्दबोधो द्रष्टव्यः। यथा- "चैत्रेण ग्रामो गम्यते" इति कर्मवाच्यमस्ति, बोधश्चैवम् - चैत्राभिन्नकर्तृवृत्तिवर्तमानकालिकव्यापारजन्यः एकत्वावच्छिन्नग्रामनिष्ठः संयोगः। अत्र धात्वर्थफलविशेष्यकः शाब्दबोधो जातः। एवञ्च व्यापारमुख्यविशेष्यकबोधे फलमुख्यविशेष्यकबोधे वा "**भावप्रधानमख्यातम्**" इति सुव्यवस्थितम् । इति शम्।

[8] पा.सू. १/३/१
[9] पा.सू. ३/४/६९
[10] पा.सू. २/१/७२ गणसूत्रम्